**संस्कृत वार्ता:**
**दिनाङ्क : 04.10.2026**
**सायम् - 06:20**

## आदौ मुख्यवार्ता:

- विदेशमन्त्री एस्. जयशङ्करः उदीयमानानां मध्यमानां च शक्तीनां परस्परसहयोगे बलं दत्तवान्।

- केन्द्रीयमन्त्री शिवराजसिंहचौहानः आन्ध्रप्रदेशे त्रि-आयामीय-कंक्रीट्-मुद्रण-प्रौद्योगिक्या त्रिलक्षगृहाणां निर्माणाय प्रायोगिकपरियोजनायाः शुभारम्भम् अकरोत्।

- उपराष्ट्रपतिः सी. पी. राधाकृष्णन् महोदयः उक्तवान् यत् विकसितभारतस्य निर्माणाय सुशासनं अदृश्याधारभूतसंरचनायाः रूपे अस्ति।

- तमिलनाडु-पुद्दुचेरी-पश्चिमबङ्गराज्येषु पञ्चानां विधानसभाक्षेत्राणाम्, असमराज्ये एकस्य लोकसभाक्षेत्रस्य च उपनिर्वाचनानां कृते प्रचारः समाप्तः।

- **अपि च,** ऐषमः वर्षस्य जापानदेशस्य नागोयानगरे एशियाई-क्रीडाः समाप्ताः; भारतं समग्रपदकतालिकायां चतुर्थं स्थानं प्राप्तवत्।

## अथ वार्ता: विस्तरेण

### जयशङ्करः – म्यूनिख-नेतृ-सम्मेलनम्

विदेशमन्त्री डॉ. एस. जयशङ्करः अवदत् यत् अन्ताराष्ट्रिया शान्तिः सुरक्षा च, आपूर्तिशृङ्खलायाः सुदृढत्वं, सम्पर्कव्यवस्था च उदीयमान-मध्यम-शक्तीनां -ई.एम.पी.इत्येतेषां कार्यसूच्याः महत्त्वपूर्णाः विषयाः सन्ति। अद्य नवदिल्ल्यां द्विषष्टितमे म्यूनिख-सुरक्षा-सम्मेलने भाषमाणः विदेशमन्त्री अवदत् यत् उदीयमानाः मध्यमाः च शक्तयः वैश्विकदक्षिणात् वैश्विकोत्तरात् च सन्ति, याः अधिकं प्रासङ्गिकत्वं प्राप्तुम् इति स्वलक्ष्ये एकीभूताः सन्ति। सः निर्दिष्टवान् यत् विश्वं परिवर्तते, तस्य कार्यसूची परिदृश्यं च परिवर्तते, उदीयमानानां मध्यमानां च शक्तीनां परस्परसहयोगाय च पर्याप्ता कार्यसूची विद्यते।

डॉ. जयशङ्करः अवदत् यत् उदीयमानानां मध्यमानां च शक्तीनां स्वकीयस्य परस्परसहयोगस्य सुदृढीकरणे रुचिः अस्ति, परन्तु अमेरिकया चीनेन च सह तासां सहयोगः भवेत् इत्यपि स्वाभाविकम् एव। उदीयमानानां मध्यमशक्तीनाम् एकया उदितया शक्त्या सह सहयोगस्य उदाहरणरूपेण सः 'क्वाड' इत्यस्य उल्लेखम् अकरोत्। सः इतोऽपि अवदत् यत् सम्पर्कव्यवस्थायाः क्षेत्रे भारत-मध्यपूर्व-यूरोप-सम्पर्कमार्गः, अन्ताराष्ट्रियः उत्तर-दक्षिण-परिवहनमार्गः, उत्तरीयः समुद्रमार्गः च सन्ति इति।

### केन्द्रीयकृषि-ग्रामविकास-मन्त्री

केन्द्रीयकृषि-ग्रामविकास-मन्त्री शिवराज-सिङ्घ-चौहानः अवदत् यत् राज्यस्य निर्धनपरिवारान् सुदृढ-गृहाणि प्रदातुं केन्द्रम् आन्ध्रप्रदेशस्य साहाय्यं करिष्यति। केन्द्रीयमन्त्रिणा मुख्यमन्त्रिणा एन. चन्द्रबाबु नायडु इत्यनेन च अद्य गुण्टूर-मण्डलस्य बुर्रिपालेम-ग्रामे 3डी-कॉँक्रीट्-मुद्रण-यन्त्रस्य उपयोगेन गृहनिर्माणस्य प्रायोगिक-परियोजनायाः आरम्भः कृतः। अस्मिन् अवसरे श्रीचौहानः अवदत् यत् केन्द्रेण आन्ध्रप्रदेशस्य कृते त्रि-लक्ष-गृहाणि अनुमोदितानि, वर्तमानस्य निर्माणस्य समाप्तेः अनन्तरम् इतोऽपि त्रि-लक्ष-गृहाणि स्वीकृतानि भविष्यन्ति। सः अग्रे अवदत् यत्, सर्वकारः षण्मासेषु गृहाणां निर्माणकार्यं समापयितुं लक्ष्यीकरोति, तथा च निर्माणस्य गुणवत्तां, स्थिरतां च धारयति ।

## उपराष्ट्रपति - आई.सी.एस्.आई. स्थापनादिवस

उपराष्ट्रपतिः सी. पी. राधाकृष्णन् महोदयः प्राबल्येन अवदत् यत् निगम-अभिशासनम् आधुनिक-अर्थव्यवस्थायाः अदृश्या आधारभूतसंरचना अस्ति। अद्य नवदिल्ल्यां भारतीय-कम्पनी-सचिव-संस्थानस्य-आई.सी.एस.आई. इत्यस्य अष्टपञ्चाशत्तमं स्थापनादिवसं सम्बोधयन् उपराष्ट्रपतिः अवदत् यत् विकसितभारतस्य निर्माणे सुदृढाः संस्थाः सुष्ठु शासनं च भौतिक्याः डिजिटल-आधारभूतसंरचनायाः च समानम् एव महत्त्वपूर्णं स्थानं भविष्यतः। राधाकृष्णन् महोदयः इदम् अपि अवदत् यत् निरन्तरायै आर्थिकप्रगतये निवेशकानां विश्वासः अनिवार्यः अस्ति इति। उपराष्ट्रपतिः उल्लिखितवान् यत् भारतं विश्वस्य द्रुततमं वर्धमानासु अर्थव्यवस्थासु अन्यतमम् अस्ति, युगपत् च द्रुतगत्या प्रौद्योगिकीप्रगतेः युगे प्रविशति इति।

आई.सी.एस.आई. संस्थानस्य विषये भाषमाणः राधाकृष्णन् महोदयः देशे उत्तमस्य निगमशासनस्य प्रोत्साहने योगदानाय संस्थानं प्रशंसितवान्, तत् च स्थायिविकासस्य वैश्विकमानदण्डरूपेण वर्णितवान्। सः इतोऽपि अवदत् यत् भारतेन विश्वस्य बृहत्तमा अर्थव्यवस्था भवितुम् आकाङ्क्षा करणीया, न तु अन्येषाम् उपरि नियमानाम् आरोपणाय, अपि तु एतदर्थं यत् कोऽपि भारतस्य उपरि अनभीष्टान् नियमान् आरोपयितुं न शक्नुयात्।

**विराम**

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते।**

**प्रोमो - सोशल मीडिया**

## उपनिर्वाचनम्

तमिलनाडु, पुद्दुचेरी, पश्चिमबङ्गाल राज्यानां पञ्चसु विधानसभासनेषु, असमस्य एकस्य लोकसभाक्षेत्रस्य च उपनिर्वाचनार्थं प्रचारः अद्य समाप्तः। षट् आसनानां कृते मतदानं मंगलवासरे भविष्यति, शुक्रवासरे च मतानां गणना भविष्यति। विधानसभा-नैर्वाचनिक-समरांगणे तमिलनाडुराज्यस्य मदुरान्तकम्, धारापुरम्, पुद्दुचेरीनगरस्य थट्टाञ्चावडी, पश्चिमबङ्गालस्य रेजिनगर, नन्दीग्राम च अस्ति। असमराज्यस्य नागांव-लोकसभाक्षेत्रस्य कृते मतदानं भविष्यति।

## प्रधानमन्त्री-सेतु

कौशल-विकास-उद्यमिता-मन्त्रालयस्य प्रधानमन्त्री-सेतु इति महत्त्वाकांक्षी योजना अद्य स्वीयं प्रथमं वर्षं पूर्णम् अकरोत्। गते वर्षे अस्मिन्नेव दिनाङ्के इयं योजना औद्योगिकाभ्यास-संस्थानाम् कायाकल्पाय प्रवर्त्तिता आसीत्। एतस्याः योजनायाः मुख्यम् उद्देश्यम् उद्योग-सञ्चालित-प्रशासनस्य सुदृढीकरणम्, प्रशिक्षण-संरचनायाः आधुनिकीकरणम्, आधुनिक-श्रमिक-आवश्यकतानुसारं च 'याचना-आधारित-पाठ्यक्रमाणां' प्रवर्त्तनम् अस्ति। षष्टि-सहस्र-कोटि-रूप्यकाणां आहत्य-व्यय-अनुमानेन निर्मितायाः अस्याः योजनायाः कृते केन्द्रेण त्रिंशत्-सहस्र-कोटिः, राज्यैः विंशति-सहस्र-कोटिः, उद्योग-क्षेत्रेण च दश-सहस्र-कोटि-रूप्यकाणां वित्तीय-योगदानं प्रदीयते।

## एशियाई-क्रीडा

ऐषमः वर्षस्य एशियाई-क्रीडाः नागोयानगरस्य 'नागोया सिटी मिज़ुहो पार्क एथ्लेटिक स्टेडियम' इति क्रीडाङ्गणे औपचारिकरूपेण समाप्ताः। एवं त्रिचत्वारिंशत्-क्रीडाविधासु सप्ताहद्वयाधिकं यावत् प्रचलिताः रोमाञ्चकाः स्पर्धाः समाप्तिं गताः। एशिया-ओलम्पिक-परिषदः अध्यक्षः क्रीडानां समाप्तिम् औपचारिकरूपेण घोषितवान्, येन अस्य महाद्वीपीयस्य क्रीडामहोत्सवस्य स्मरणीयं संस्करणं सम्पन्नम्। प्रथमानाम् एशियाई-क्रीडानां औपचारिकी करदीपः ध्वजः च कतरदेशस्य प्रतिनिधिभ्यः समर्पितौ। कतरदेशः त्रिंशदधिक-द्विसहस्र तमे वर्षे दोहानगरे आगामिसंस्करणस्य आतिथ्यं करिष्यति। अनेन समर्पणेन 'नागोया २०२६' इत्यस्मात् 'दोहा २०३०' प्रति औपचारिकं हस्तान्तरणं सम्पन्नम्। भारतीया लक्ष्यवेधिनी नीरू ढाण्डा, या एतासु क्रीडासु द्वे स्वर्णपदके एकं रजतपदकं च जितवती, समापनसमारोहे देशस्य ध्वजवाहिकारूपेण भारतीयध्वजं धृतवती। भारतं समग्रपदकतालिकायां चतुर्थं स्थानं प्राप्तवत्। भारतेन प्रभावशालीनि पञ्चाशीतिः पदकानि जितानि, येषु एकविंशतिः स्वर्णपदकानि, सप्तविंशतिः रजतपदकानि, सप्तत्रिंशत् कांस्यपदकानि च सन्ति।

**भारत-ऋतु-विज्ञान-विभागः**

भारत-ऋतु-विभागेन केरलम, माहे, तमिलनाडु, पुदुचेरी, कराईक्काल-क्षेत्रेषु च पृथक-पृथक स्थानेषु श्वः यावत् प्रचण्डवृष्टेः पूर्वानुमानं कृतम् अस्ति। आगामि-दिनेषु मराठवाडा-विदर्भयोः शेषभागेषु, महाराष्ट्र-छत्तीसगढयोः केषुचित भागेषु, तेलङ्गाना-राज्ये, कर्नाटकस्य उत्तरान्तरिकक्षेत्रेषु च नैर्ऋत्य-प्रावृट्कालस्य पुनरागमनस्य स्थितिः अनुकूलः भवितुम् अर्हति इति विभागेन उक्तम्। विभागेन उक्तं यत् आगामि-दिनद्वयोः आन्ध्रप्रदेशे, तमिलनाडु- पुदुचेरी, कराईक्काल-क्षेत्रेषु च मेघगर्जनस्य, विद्युत-स्खलनस्य च स्थितिः अनुवर्तते।

**॥ इति वार्ता: ॥**